अस्यार्थः ॥ कामः " क्लीं " माया " ह्रीं " रमा " श्रीं " बाला "ऐंक्लींसौः" त्रिपुरा " श्रींह्रींक्लीं " स्त्री " स्त्रीं " इति बीजं । भगः " एः " अंकुशः "क्रों" कालिका "क्रीं" कमला " श्रीं " कूर्चः " हुं " इति कवचं । प्रणवः " ॐ " ॥ १२ ॥

मंत्रोद्धारः ॥ श्रीर्माया मदनो वाणी परा तारः शिवप्रिया । हरिप्रिया त्रिकूटा च परा वाणी मनोभवः ॥ माया लक्ष्मीर्महाविद्या सबीजा षोडशी परा ॥ १३ ॥ " श्रींह्रींक्लींऐंसौः ॐह्रींश्रींऐंक्लींसौः सौःऐंक्लींह्रींश्रीं " । रमादिषोडशी पातु करौ त्रिपुरसुंदरी ॥ १३ ॥

अस्यार्थः ॥ श्रीः " श्रीं " माया " ह्रीं " मदनः " क्लीं " वाणी "ऐं" परा "सौः" तारः " ॐ " शिवप्रिया " ह्रीं " हरिप्रिया " श्रीं " त्रिकूटा " ऐंक्लींसौः " परा "सौः" वाणी " ऐं " मनोभवः "क्लीं" माया "ह्रीं" लक्ष्मीः " श्रीं " ॥ १३ ॥

मंत्रोद्धारः ॥ मायात्मा प्रणवो वाणी माया लक्ष्मीश्च सुंदरी । युवत्यंकुशवा-

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्माया कूर्चयुग्मं रमेति च ॥ १४ ॥ " ह्रीं ह्स्रौः ॐ ऐंह्रींश्रीं ऐंक्लींसौः स्त्रींक्रों
ऐंह्रींहूंहूंश्रीं । " मायादिषोडशी ख्याता हृदयं परिरक्षतु ॥ १४ ॥

अस्यार्थः ॥ माया " ह्रीं " । आत्मा आत्मबीजं " ह्स्रौः " । प्रणवः " ॐ " वाणी " ऐं " माया " ह्रीं " लक्ष्मीः " श्रीं " सुंदरी बाला " ऐंक्लींसौः " । युवति "स्त्रीं" । अंकुशः " क्रों " । वाणी " ऐं " । माया " ह्रीं " । कूर्चयुग्मं दीर्घहूंकारद्वयं । रमा " श्रीं " ॥ १४ ॥

मंत्रोद्धारः ॥ वागादिप्रणवाः पंच त्रिपुरे द्वे पुनश्च ते । अनुलोमविलोमाभ्यां
शापदोषो न विद्यते ॥ वागादिषोडशी पूर्णा सरस्वत्याप्युपासिता ॥ १५ ॥
" ऐं ह्रीं श्रीं क्लीं सौः ऐं क्लीं सौः सौः क्लीं ऐं सौः क्लीं श्रीं ह्रीं ऐं " । वागादिषो-
डशी पातु स्तनौ मे सुंदरी परा ॥ १५ ॥

अस्यार्थः ॥ वाग्भवबीजादिपंचप्रणवा आगमशास्त्रे प्रसिद्धाः । उद्धृताश्च ते प्रणवाः पंच । " ऐंह्रींश्रींक्लींसौः " पंचप्रणवोद्धारः ॥ यथा ॥ वाग्भवं भुवनेशीं च रमाबीजं मनोभवः । बीजं बाला तृतीयं च पराख्यं बीजमुत्तमम् ॥ पंच तारा इमे ज्ञेया मंत्रादौ योजिताः प्रिये । मंत्रस्य सिद्धिदाः प्रोक्तास्तस्मादादौ प्रयोजयेत् ॥ त्रिपुरे द्वे वारद्वयं । अनुलोमविलोमेन बालाविद्या

२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

" ऐंक्लींसौः सौःक्लींऐं "। पुनश्च ते वागादयः पंच प्रणवाः "सौःक्लींश्रींह्रींऐं " इयंच वागादिषोडशी ॥ १५ ॥

मंत्रोद्धारः ॥ स्मरं योनिं श्रिया सार्धं तथा चागस्तिवाग्भवं । कामबीजं कामकूटमगस्त्यकामराजयोः ॥ शक्तिबीजं शक्तिकूटमगस्त्यकामराजयोः । एवं वर्णांल्लिखेत्प्राज्ञो विंशत्यर्णा समीरिता ॥ १६ ॥ " कएश्रींहसकलह्रींक्लींहसकहलह्रीं सौःसकलह्रीं नखवर्णा पार्श्वौ पात्वपराजिता ॥ १६ ॥

अस्यार्थः ॥ आदौ स्मरं " कः " । तदनंतरं योनिं " एः " । एतद्बीजद्वयं । श्रिया " श्रीं " । इति बीजेन सार्धं उच्चरेत् । तदनंतरं " हसकलह्रीं " इति पंचवर्णा अगस्तिवाग्भवकूटं विद्यायाः अपराजिताख्यविद्यायाः वाग्भवकूटमुद्धरेत् ॥ तदनंतरं कामबीजं "क्लीं"। अगस्त्यकामराजयोः कामकूटं " हसकहलह्रीं " इति उद्धरेत् । तदनंतरं शक्तिबीजं " सौः " । अगस्त्यकामराजयोः तृतीयं कूटं " सकलह्रीं " इति शक्तिकूटं उद्धरेत् । तेन नखरव्वर्णा अपराजिता विद्या [illegible] भवति ॥ १६ ॥

मंत्रोद्धारः ॥ भुवनेशी प्राणजीवौ जीवप्राणौ तथेश्वरी । जीवप्राणौ प्राणजीवौ कामबीजं तथोद्धरेत् ॥ अगस्त्यकामराजस्य षड्वर्णांश्च तथोद्धरेत् । मायाशक्ति-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

युगे शंभुः षड्वर्णा कुंभजन्मनः ॥ कामराजाख्यकूटस्य कामबीजं तथोद्धरेत् ॥ प्राणजीवौ जीवप्राणौ मायाबीजं तथोद्धरेत् । जीवप्राणौ प्राणजीवौ भुवनेशी तथोद्धरेत् ॥ १७ ॥ " ह्रीं ह्सौं स्हौं ह्रीं स्हौं ह्सौं क्लीं हसकहलह्रीं ह्रीं ह्रीं सौः सौः हहसकहलह्रींक्लींह्सौं स्हौंह्रींस्हौंह्सौं ह्रींमे ॥ सुंदरीयं समाख्याता महापुरुषपूजिता । महागुह्यस्वरूपा च केवलानंदचिन्मयी ॥ एकत्रिंशद्वर्णरूपा कटिदेशं सदावतु ॥ १७ ॥

अस्यार्थः ॥ भुवनेशी"ह्रीं" ॥१॥ प्राणजीवौ प्राणः "हः" जीवः "सः" "औ" औकारः । तेन ह्सौ इति जातं । अत्र बिंदुरहितानां "हकार-सकार-औकार" रूपाणां त्रयाणां वर्णानां बीजत्वं भवति। तेन तंत्रांतरैकवाक्यत्वसापेक्षत्वेन संप्रदायाच्च "हकार-सकार-औकारा"ख्यवर्णत्रयाढ्यबीजस्योपरि बीजत्वसिद्धये शिरसि अर्धचंद्राबिंदुलक्षणं ध्वनिरूपं वर्णद्वयं ज्ञेयं । एवमन्यत्रापि जीवप्राणौ इति स्थले ज्ञेयं " ह्सौं " ॥ २ ॥ जीवप्राणौ । जीवः " सः " प्राणः " हः " औ औकारः शेषं प्राग्वत् ॥ ३ ॥ तथा ईश्वरी भुवनेश्वरी बीजं " ह्रीं " ॥ ४ ॥ जीवप्राणौ " स्हौं " ॥ ५ ॥ प्राग्वत् प्राणजीवौ " ह्सौं " ॥ ६ ॥ कामबीजं " क्लीं " ॥ ७ ॥ अगस्त्यकामराजकूटस्थान्षड्वर्णान् " हसकहलह्रीं" उद्धरेत् ॥ १३ ॥ मायायुगं "ह्रीं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्रीं" ॥ १५ ॥ शक्तियुगं " सौः सौः " ॥१७॥ शंभुः " हः " ॥१८॥ पुनः कुंभजन्मनः अगस्त्यकामराजविद्यायाः कामकूटस्थ " हसकहलह्रीं " इति षड्वर्णान् उद्धरेत् ॥२४॥ ततः कामबीजं " क्लीं " ॥ २५ ॥ प्राणजीवौ " ह्सौं " ॥२६॥ प्राग्वत् जीवप्राणौ " स्हौं " ॥ २७ ॥ माया " ह्रीं " जीवप्राणौ " स्हौं " ॥ २९ ॥ पूर्ववत् प्राणजीवौ " ह्सौं " ॥ ३० ॥ भुवनेश्वरी " ह्रीं " ॥ ३१ ॥ १७ ॥

मंत्रोद्धारः ॥ आकाशजीवकामेंद्रभुवनेशी तथोद्धरेत् । आकाशजीवकामाभ्रशक्रमीशानवल्लभाम् ॥ जीवं कामं तथा शक्रं भुवनेशीं तथोच्चरेत् ॥ १८ ॥

अगस्त्योपासिता लोपामुद्रेयं पशुहारिणी ॥ समुद्रशोषिणी देवी महापापौघनाशिनी ॥ १९ ॥ " हसकलह्रीं "मे पृष्ठं कूटं वाग्भवसंज्ञकम् ॥ " हसकहलह्रीं" कुक्षिं कामकूटं सदावतु ॥ वक्षस्थलं शक्तिकूटं " सकलह्रीं " सदावतु ॥१८॥ "हसकलह्रीं हसकहलह्रीं सकलह्रीं" मे । लोपामुद्रा पंचदशी मध्यदेशं सदावतु ॥ १९ ॥

अस्यार्थः ॥ आकाशः " हः " जीवः " सः " कामः "कः" इंद्रः " लः " भुवनेशी "ह्रीं" ॥ पुनः आकाशः " हः " जीवः " सः " कामः " कः " अभ्रः " हः " शक्रः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

“ ल: ” ईशवल्लभा “ ह्रीं ” ॥ पुनः जीवः “ सः ” कामः “ कः ” शक्रः “ लः ”
भुवनेशी “ह्रीं” ॥ एतस्या विद्यायाः कस्मिंश्चित्तंत्रे अगस्त्यविद्या इति नाम कस्मिंश्चित्तंत्रांतरे
लोपामुद्राविद्येति नाम इति नाम्नोर्व्यत्ययो ज्ञेयः ॥ १८ ॥ १९ ॥

मंत्रोद्धारः ॥ कामो व्योम च योनिश्च लक्ष्मीरिंद्रः शिवप्रिया । आकाशो
मदनो योनिर्लक्ष्मीरिंद्रः शिवप्रिया। जीवः कामश्च योनिश्च लक्ष्मीरिंद्रः शिवप्रि-
या । एषा तु मानवी विद्या सर्वतो मां सदावतु ॥ २० ॥ २१ ॥ “ कहएईल-
ह्रीं ” नाभिं “ हकएईलह्रीं ” कटिं । सक्थिनी मे सदा पातु “ सकएई-
लह्रीं ” सदा ॥ २० ॥ “ कहएईलह्रीं हकएईलह्रीं सकएईलह्रीं ” मे । मान-
वीविद्या सर्वतः परिरक्षतु ॥ २१ ॥

अस्यार्थः ॥ कामः “ कः ” व्योम “ हः ” योनिः “ एः ” लक्ष्मीः “ ईः ” इंद्रः
“ लः ” शिवप्रिया “ ह्रीं ” । आकाशः “ हः ” मदनः “ कः ” योनिः “ एः ”
लक्ष्मीः “ ईः ” इंद्रः “ लः ” शिवप्रिया “ ह्रीं ” । जीवः “ सः ” कामः “ कः ”
योनिः “ एः ” लक्ष्मीः “ ईः ” इंद्रः “ लः ” शिवप्रिया “ ह्रीं ” ॥ २० ॥ २१ ॥

मंत्रोद्धारः ॥ जीवः प्राणश्च कामश्च योनिर्लक्ष्मीः शतक्रतुः । शिवप्रिया च

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जीवश्च प्राणः कामो नभस्तथा । योनिर्लक्ष्मीः सहस्राक्षो महामाया नभस्तथा ।
जीवः कामश्च योनिश्च लक्ष्मीरिंद्रस्ततः परं। महामायांतिका विद्या चंद्राराधितदे-
वता । द्वाविंशत्यक्षरी प्रोक्ताऽमृताख्या देवि दुर्लभा ॥ २२ ॥ २३ ॥ " सह-
कएईलह्रीं " मे ऊरुयुग्मं सदावतु । " सहकहएईलह्रीं " गुह्यं पातु सदा मम ।
" हसकएईलह्रीं " तु जानुनी पातु मे सदा ॥ २२ ॥ " सहकएईलह्रीं सहक-
हएईलह्रीं हसकएईलह्रीं " मम । जलजे भयसंघाते सर्वतः परिरक्षतु ॥ २३ ॥

अस्यार्थः ॥ जीवः " सः " प्राणः " हः " कामः " कः " योनिः " एः " लक्ष्मीः
" ईः " शतक्रतुः " लः " शिवप्रिया " ह्रीं " जीवः " सः " प्राणः " हः " कामः
" कः " नभः " हः " योनिः " एः " लक्ष्मीः " ईः " सहस्राक्षो " लः " महामाया
" ह्रीं " नभः " हः " जीवः " सः " कामः " कः " योनिः " एः " लक्ष्मीः " ईः "
इंद्रः " लः " महामाया " ह्रीं " ॥ २२ ॥ २३ ॥

मंत्रोद्धारः॥ प्राणो जीवस्तथा कामो योनिर्लक्ष्मीः शतक्रतुः। महामाया शिवो
जीवः कामः शंभुर्भगस्तथा ॥ वामनेत्रं सहस्राक्षो भुवनेशी ततः परं। जीवः प्रा-
णः कामराजो योनिर्लक्ष्मीः पुरंदरः॥ हृल्लेखा च ततः प्रोक्ता विद्या धनदपूजि-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ता । निधिदा गगने यानं ददात्यखिलसिद्धिदा ॥ २४ ॥ २५ ॥ " हसकएई-
लह्रीं " मे गुल्फयुग्मं सदावतु । " हसकहएईलह्रीं " पादौ पातु सदा मम ।
" सहकएईलह्रीं " मे प्रपदौ पातु सर्वदा ॥ २४ ॥ " हसकएईलह्रीं हसक-
हएईलह्रीं सहकएईलह्रीं" सदा कुबेरेण प्रपूजिता । द्वाविंशत्यक्षरी विद्या सर्वांगं
मे सदावतु ॥ २५ ॥

अस्यार्थः ॥ प्राणः " ह: " जीवः " सः " कामः " कः " योनिः " एः " लक्ष्मीः " ईः " शतक्रतुः " लः " महामाया " ह्रीं " शिवः " हः " जीवः " सः " कामः " कः " शंभुः " हः " भगः " एः " वामनेत्रः " ईः " सहस्राक्षो " लः " भुवनेशी " ह्रीं " । जीवः " सः " प्राणः " हः " कामः " कः " योनिः "एः" लक्ष्मीः "ईः" पुरंदरः " लः " हृल्लेखा " ह्रीं " ॥ २४ ॥ २५ ॥

मंत्रोद्धारः ॥ मनोभूर्योनिर्वामाक्षी पुरंदरशिवप्रिया । प्राणो जीवोऽनंगशंभू शुनासीरो हरप्रिया ॥ जीवः प्राणः पुनर्जीवश्चित्तजन्मा पुरंदरः । महामायेति संप्रोक्ता लोपामुद्राप्रपूजिता ॥ महासौभाग्यजननी सूर्यादिस्तंभकारिणी ॥२६॥
॥ २७ ॥ " कएईलह्रीं " प्राच्यां मां त्रिपुरा परिरक्षतु ॥ " हसकहलह्रीं "

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पातु वह्निकोणे निरंतरं ॥ " सहसकलह्रीं " याम्यां पातु मां सर्वसिद्धिदा ॥ २६ ॥ कएईलह्रीं हसकहलह्रीं सहसकलह्रीं विद्यागस्त्यसेव्या च चक्रस्था मां सदावतु ॥ २७ ॥

अस्यार्थः ॥ मनोभूः " कः " योनिः " एः " वामाक्षी " ईः " पुरंदरः " लः " शिवप्रिया " ह्रीं " ॥ प्राणः " हः " जीवः " सः " अनंगः कः " शंभुः " हः " शुनासीरः " लः " हरप्रिया " ह्रीं " जीवः " सः " प्राणः " हः " पुनः जीवः "सः" चित्तजन्मा " कः " पुरंदरः " लः " महामाया " ह्रीं " ॥ एतस्या विद्यायाः क्वचित्तंत्रे अगस्त्यविद्येति नाम तन्त्रान्तरे च लोपामुद्रेति संप्रदायभेदाज्ज्ञेयम् ॥ २६ ॥ २७ ॥

मंत्रोद्धारः ॥ जीवो योनिर्वामनेत्रपुरंदरहरप्रियाः । जीवः प्राणश्चित्तजन्मा हरः शक्रः शिवप्रिया ॥ जीवः कामः सहस्राक्षः शिवपत्नी ततो भवेत् । नंद्याराधितविद्येयं शिवसान्निध्यकारिणी ॥ २८ ॥ २९ ॥ " सएईलह्रीं " च नित्यं नैरृत्यां मां सदावतु ॥ " सहकहलह्रीं " पातु प्रतीच्यां मे द्वितीयकम् ॥ "सकलह्रीं " तु वायव्ये सदा मां परिरक्षतु ॥ २८ ॥ " सएईलह्रीं सहकहलह्रीं सकलह्रीं " तु । नंद्याराधितविद्येयं सर्वांगं मे सदावतु ॥ २९ ॥

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अस्यार्थः ॥ जीवः " सः " योनिः " एः " वामनेत्रः " ईः " पुरंदरः " लः " हरप्रिया " ह्रीं " ॥ जीवः " सः " प्राणः " हः " चित्तजन्मा " कः " हरः "हः " शक्रः " लः " शिवप्रिया " ह्रीं " ॥ जीवः " सः " कामः " कः " सहस्राक्षः "लः" शिवपत्नी " ह्रीं " नंद्याराधितविद्योद्धारस्तूक्तप्रायः ॥ २८ ॥ २९ ॥

मंत्रोद्धारः ॥ प्राणो जीवस्तथा कामः सहस्राक्षो हरप्रिया ॥ जीवः प्राणः कामराजो पुरंदरो हरप्रिया ॥ जीवः कामः शिवः शक्रः शिवपत्नी तथैव च । सूर्याराधितविद्येयं महातेजःप्रदायिनी ॥ ३० ॥ ३१ ॥ " हसकलह्रीं " वायव्ये " सहकलह्री " मुत्तरे ॥ " सकलह्री " मीशान्ये सुंदरी पातु मां सदा ॥ ३० ॥ " हसकलह्रीं सहकलह्रीं सकहलह्रीं " मां । ऊर्ध्वे रक्षतु मे नित्यं सूर्यपूज्या महोदया ॥ ३१ ॥

अस्यार्थः ॥ प्राणः " हः " जीवः " सः " कामः " कः " सहस्राक्षः " लः " हरप्रिया " ह्रीं " जीवः " सः " प्राणः " हः " कामराजः " कः " पुरंदरः " लः " हरप्रिया " ह्रीं " ॥ जीवः " सः " कामः " कः " शिवः " हः " शक्रः " लः " शिवपत्नी " ह्रीं " ॥ सूर्यविद्योद्धारस्तूक्तप्राय एव ॥ ३० ॥ ३१ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मंत्रोद्धारः ॥ कामो योनिर्विष्णुजाया शक्रः शिवनितंबिनी ॥ शिवो जीवः कामराजः शिवः शक्रो हरप्रिया ॥ जीवः कामः सहस्राक्षः शिवपत्नी तथैव च ॥ इयं पंचदशी देवराजपूज्या निरंतरं ॥ महासिद्धिप्रदा प्रोक्ता जगद्वश्यविधायिनी ॥ ३२ ॥ " कएईलह्रीं हसकहलह्रीं सकलह्रीं " मे । सर्वांगं वै शक्रपूज्या सततं परिरक्षतु ॥ ३२ ॥

अस्यार्थः ॥ कामः "कः" योनिः "एः" "विष्णुजाया "ईः" शक्रः "लः" शिवनितंबिनी "ह्रीं" शिवः "हः" जीवः "सः" कामराजः "कः" शिवः "हः" शक्रः "लः" हरप्रिया "ह्रीं" ॥ जीवः "सः" कामः "कः" सहस्राक्षः "लः" शिवपत्नी "ह्रीं" ॥ ३२ ॥

मंत्रोद्धारः ॥ कामो योनिर्वामनेत्रं शुनासीरः शिवप्रिया ॥ आकाशो मदनाकाशौ पुरंदरो हरप्रिया ॥ प्राणो जीवः कामराजः शक्रः शिवनितंबिनी ॥ ब्रह्मविद्येयमाख्याता परब्रह्मस्वरूपिणी ॥ ३३ ॥ " कएईलह्रीं हकहलह्रीं हसकलह्रीं" च । ब्रह्माणी मां सदा पायाच्छ्रीमत्त्रिपुरसुंदरी ॥ ३३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अस्यार्थः ॥ कामः " कः " योनिः " एः " वामनेत्रं " ईः " शुनासीरः " लः " शिवप्रिया " ह्रीं " आकाशः " हः " मदनः " कः " पुनराकाशः " हः " पुरंदरः " लः " हरप्रिया " ह्रीं " प्राणः " हः " जीवः " सः " कामराजः " कः " शक्रः " लः " शिवनितंबिनी " ह्रीं " ॥ ३३ ॥

मंत्रोद्धारः ॥ प्राणो जीवः स्मरः शक्रः शिवपत्नी महेश्वरः ॥ जीवः कामः पशुपतिः शक्रः शिवनितंबिनी ॥ जीवः स्मरः सहस्राक्षो हरपत्नी नभस्ततः ॥ जीवः कामः सहस्राक्षः शंभुर्जीवः स्मरः शिवः ॥ इंद्रो जीवः स्मरः शक्रः शिवपत्नी तथैव च ॥ चतुष्कूटा महाविद्या वसुपक्षार्णवसंमिता ॥ शिवेन पूजिता नित्यं शिवरूपविधायिनी ॥ ३४ ॥ " हसकलह्रीं हसकहलह्रीं सकलह्रीं " च " हसकलहसकहलसकलह्रीं " शांकरी । चतुष्कूटा महाविद्या पाताले मां सदावतु ॥ ३४ ॥

अस्यार्थः ॥ प्राणः " हः " जीवः " सः " स्मरः " कः " शक्रः " लः " शिवपत्नी " ह्रीं " महेश्वरः " हः " जीवः " सः " कामः " कः " पशुपतिः " हः " शक्रः " लः " शिवनितंबिनी " ह्रीं " जीवः " सः " स्मरः " कः " सहस्राक्षः " लः "

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हरपत्नी " ह्रीं " नभः " हः " जीवः " सः " कामः " कः " सहस्राक्षः " लः " शंभुः " हः " जीवः " सः " स्मरः " कः " शिवः " हः " इंद्रः " लः " जीवः " सः " स्मरः " कः " शक्रः "लः" शिवपत्नी "ह्रीं" ॥ ३४ ॥

मंत्रोद्धारः ॥ प्राणो जीवः स्मरः शक्रो हरजाया शिवः सकौ ॥ शिवः शक्रो महामाया जीवः कामः शतक्रतुः ॥ महामाया सहौ कामः शतक्रतुर्हरप्रिया ॥ जीवः प्राणः स्मरः शंभुः शक्रः शिवनितंबिनी ॥ जीवः प्राणः पुनर्जीवः स्मरः शक्रः शिवप्रिया ॥ षट्कूटा वैष्णवी प्रोक्ता सकलापन्निवारिणी ॥ ३५ ॥ ३६ ॥ " हसकलह्रीं " माधारं ॥ " हसकहलह्रीं " लिंगे ॥ " सकलह्रीं " पातु नाभिं ॥ " सहकलह्रीं " हृदये ॥ " सहकहलह्रीं " कंठं ॥ " सहसकलह्रीं " ह्रीं सहसकलह्रीं ॥ मनोभवा सदा पातु रससंख्या महाप्रभा । षट्कूटा वैष्णवी विद्या पातु मां सुंदरी परा ॥ ३६ ॥

" हसकलह्रीं हसकहलह्रीं सकलह्रीं । सहकलह्रीं सहकहल- नाभ्याम् ॥ ३५ ॥

अस्यार्थः ॥ प्राणः " हः " जीवः " सः " स्मरः " कः " शक्रः " लः " हरजाया " ह्रीं " । "हसकलह्रीं" ॥ १ ॥ शिवः "हः" सकौ " सकारककारौ" शिवः " हः "

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शक्रः " लः " महामाया " ह्रीं " । " हसकहलह्रीं " ॥ २ ॥ जीवः " सः " कामः " कः " शतक्रतुः " लः " महामाया "ह्रीं" " सकलह्रीं " ॥ ३ ॥ " सहौ " सकार-हकारौ । कामः " कः " शतक्रतुः " लः " हरप्रिया " ह्रीं " । " सहकलह्रीं " ॥ ४ ॥ इदं सूर्यविद्याया द्वितीयं कामराजकूटं ज्ञेयम् ॥ जीवः " सः " प्राणः " हः " स्मरः " कः " शंभुः " हः " शक्रः " लः " शिवनितंबिनी " ह्रीं " । " सहकहलह्रीं " ॥ ५ ॥ जीवः " सः " प्राणः " हः " पुनर्जीवः " सः " स्मरः " कः " शक्रः "लः" शिवप्रिया " ह्रीं " ॥ " सहसकलह्रीं " ॥ ६ ॥ ३५ ॥ ३६ ॥

मंत्रोद्धारः ॥ कामो भगो रमा शक्रः शंभुरग्निस्त्रिमूर्तिधृक् । प्राणो जीवः स्मरः शंभुः शक्रः शंभुस्तनूनपात् ॥ वामनेत्रयुतो जीवः कामः शक्रो महे-श्वरः । वह्निर्वामाक्षिसंयुक्तो विद्या दुर्वाससा पुरा ॥ आराधिता शत्रुनाशकरी ज्ञेया सुदुर्लभा ॥ ३७ ॥ " कएईलह्रीं हसकहलह्रीं सकलह्रीं " च । दुर्वाससा प्रपूज्या मां दिक्षु विद्या सदावतु ॥ ३७ ॥

अस्यार्थः ॥ कामः " कः " भगः " एः " रमा " ईः " शक्रः " लः " शंभुः "हः" अग्निः " रः " अयं त्रिमूर्तिना श्रीकंठादिन्यासे उक्तदीर्घईकारेण युक्तः तेन " ह्रीं " इति

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जातः ॥ प्राणः " हः " जीवः " सः " स्मरः " कः " शंभुः " हः " शक्रः " लः " पुनः शंभुः " हः " तनूनपात् अग्निः " रः " अयं वामनेत्रेण दीर्घईकारेण युक्तः तेन " ह्रीं " इति जातं ॥ जीवः " सः " कामः " कः " शक्रः " लः " महेश्वरः " हः " वह्निः " रः " वामाक्षियुक्तः दीर्घईकारयुक्तः तेन " ह्रीं " इति जातं ॥ ३७ ॥

मंत्रोद्धारः ॥ कामः शिवो भगो लक्ष्मीरिंद्रः शिवनितंबिनी । शिवः शक्रो भगो लक्ष्मीरिंद्रः शिवनितंबिनी । जीवः स्मरो भगो लक्ष्मीरिंद्रः शिवनितंबिनी ॥ अष्टादशाक्षरी विद्या यमेनाराधिता सदा ॥ ३८ ॥ " कहएईलह्रीं हलएईलह्रीं सकएईलह्रीं " । क्रोधेन पूजिता देवी विदिक्षु परिरक्षतु ॥ ३८ ॥

अस्यार्थः ॥ कामः " कः " शिवः " हः " भगः " एः " लक्ष्मीः " ईः " इंद्रः " लः " शिवनितंबिनी " ह्रीं " ॥ शिवः " हः " शक्रः " लः " भगः " एः " लक्ष्मीः " ईः " इंद्रः " लः " शिवनितंबिनी " ह्रीं " ॥ जीवः " सः " स्मरः "कः" भगः " एः " लक्ष्मीः " ईः " इंद्रः " लः " शिवनितंबिनी " ह्रीं " ॥ ३८ ॥

मंत्रोद्धारः ॥ प्राणो जीवः स्मरः शक्रः शिवपत्नी शिवः सकौ ॥ शिवः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंभुः सहस्राक्षः शिवपत्नी सकौ लह्रीं ॥ महाज्ञानमयी प्रोक्ता षोडशी सर्वसिद्धिदा ॥ ३९ ॥ " हसकलह्रीं हसकहहलह्रीं सकलह्रीं "। महाज्ञानमयी विद्या षोडशी मां सदावतु ॥ ३९ ॥

अस्यार्थः ॥ प्राणः " हः " जीवः " सः " स्मरः " कः " शक्रः " लः " शिवपत्नी " ह्रीं " शिवः " हः " सकौ " सः " " कः " शिवः " हः " शंभुः " हः " सहस्राक्षः " लः " शिवपत्नी "ह्रीं" ॥ सकौ " सः कः " " लह्रीं"—लकारह्रींकारौ ॥३९॥

मंत्रोद्धारः ॥ हरिप्रिया महामाया कामवाक्शक्तिबीजकम् ॥ तारं माया रमाबीजं वाग्भवं चित्तजन्मनः ॥ विद्यायाः स्वद्वितीयं च तृतीयं शक्तिसंज्ञकम् ॥ शक्तिवाक्कामबीजानि महामाया हरिप्रिया ॥ बीजरूपा षोडशीयं सर्वसंपत्तिदा परा ॥ ४० ॥ केवलबीजरूपा ॥ " श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं ऐं क्लीं सौः सौः ऐं क्लीं ह्रीं श्रीं "। सर्वांगं मे सदा पातु बीजरूपा च षोडशी ॥४०॥

कूटत्रयसहिता मतांतरे ॥ श्रींह्रींक्लींऐंसौः ॐ ह्रींश्रींकएईलह्रीं हसकहलह्रीं सकलह्रींसौः ऐंक्लींह्रींश्रीं। सर्वांगं मे सदा पातु बीजरूपा च षोडशी ॥ ४० ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अस्यार्थः ॥ हरिप्रिया " श्रीं " महामाया " ह्रीं " कामः " क्लीं " वाक् " ऐं "
शक्तिबीजं " सौः " । बीजं सर्वत्र विशेषणं । तारं " ॐ " माया " ह्रीं" रमा "श्रीं" ।
बीजं सर्वत्रान्वयः । वाग्भवबीजं " ऐं " । चित्तजन्मनः विद्यायाः स्वकामराजविद्यायाः प्रथ-
मकूटमिति । द्वितीयं कामराजबीजं द्वितीयं कूटमिति । तृतीयं शक्तिबीजं शक्तिकूटमिति
केचिन्मते । अन्येषां मते तु कूटसंयुतं चित्तजन्मनः विद्यायाः कामराजविद्यायाः कूटत्र-
यमिति भावः ॥ ४० ॥

मंत्रोद्धारः ॥ प्रणवः कामराजश्च महामाया हरिप्रिया । बाला विद्या काम-
राजः पंचाधिकदशाक्षरी ॥ युवती वागंकुशाख्यं काली कामकला तथा ।
कूर्चबीजमियं प्रोक्ता श्रीमहाषोडशी परा ॥ ज्ञानेन मृत्युशमनी महादेवेन
पूजिता ॥ ४१ ॥ " ॐ क्लीं ह्रीं श्रीं ऐं क्लीं सौः कएईलह्रीं हसकहलह्रीं सक-
लह्रीं स्त्रीं ऐं क्रों क्रीं ईं हुं " महादेवी ॥ श्रीमहाषोडशी पूर्णा प्रथिता भुवनत्र-
ये ॥ ज्ञानेन मृत्युशमनी शिरस्स्था सर्वतोऽवतु ॥ श्रीमहाषोडशी पूर्णा महादेवेन
पूजिता । यस्या विज्ञानमात्रेण मृत्योर्मृत्युर्भवेत्स्वयम् ॥ ४१ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

अस्यार्थः ॥ प्रणवः " ॐ " कामराजः " क्लीं " महामाया " ह्रीं " हरिप्रिया "श्रीं" बालाविद्या " ऐं क्लीं सौः " कामराजपंचाधिकदशाक्षरी " कएईलह्रीं हसकहलह्रीं सकलह्रीं युवतिः " स्त्रीं " वाक् " ऐं " अंकुशाख्यं " क्रों " काली " क्रीं " कामकला " ईं " कूर्चः " हूं " ॥ ४१ ॥

मंत्रोद्धारः ॥ वाग्बीजं कामराजाख्यं पंचदश्याः समुद्धरेत् । वाक्कूटं कामबीजं च द्वितीयं कूटमुद्धरेत् ॥ कामराजाख्यविद्यायाः बालाबीजं तृतीयकम् । तृतीयं कामराजाख्यविद्यायाः कूटमुद्धरेत् ॥ परमात्ममनुं चैव प्रासादमजपामनुम् । महामाया कामराजः पंचदश्यास्तृतीयकं ॥ बाला बीजं तृतीयं तु पुनर्देयं वरानने । पंचदश्या द्वितीयं तु कूटं बाला द्वितीयकम् ॥ बीजं कामस्य कथितं पंचदश्यास्तु वाग्भवम् । प्रथमं कूटमुद्धृत्य बालावाग्भवमेव च ॥ अष्टादशाक्षरी विद्या परब्रह्मस्वरूपिणी ॥ ४२ ॥ " ऐंकएईलह्रीं क्लींहसकहलह्रीं सौः सकलह्रीं सोहंहौं हंसः ह्रीं सकलह्रीं सौः हसकहलह्रीं क्लीं कएईलह्रीं ऐं " ब्रह्मस्वरूपिणी । अष्टादशाक्षरीविद्या परमानंदचिद्घना । नेत्रवेदात्मकैर्वर्णैर्युता मां सर्वतोऽवतु ॥ ४२ ॥

अस्यार्थः ॥ वाग्बीजं "ऐं" । कामराजाख्यं पंचदश्याः वाक्कूटं "कएईलह्रीं" इति समुद्धरेत् । कामबीजं बालाविद्यायाः द्वितीयं बीजं " क्लीं " । कामराजाख्यपंचदशीविद्यायाः द्वितीयं कूटं " हसकहलह्रीं " इति समुद्धरेत् । बालाविद्यायाः तृतीयं " सौः " । कामराजाख्यविद्यायाः तृतीयं कूटं " सकलह्रीं " इति समुद्धरेत् । परमात्मा मनुः " सोहं " इति परमात्ममंत्रं उद्धरेत् । प्रासादं " हौं " इति प्रासादमंत्रं समुद्धरेत् । अजपामनुं " हंसः " इत्यजपामंत्रमुद्धरेत् । महामाया " ह्रीं " इति समुद्धरेत् । कामराजाख्यविद्यायाः तृतीयं कूटं " सकलह्रीं " । बाला तृतीयं बीजं " सौः" । कामस्य पंचदश्यास्तु द्वितीयं कूटं " हसकहलह्रीं " । बाला द्वितीयं बीजं " क्लीं " । कामस्य पंचदश्याः प्रथमं वाग्भवं कूटं "कएईलह्रीं " इति उद्धृत्य बालाविद्यायाः बीजत्रयाणां तथा कामराजाख्यपंचदशीविद्यायाः त्रिकूटानामादावंते अनुलोमविलोमेन उच्चारणादेषां द्वादशानां द्वादशाक्षराण्यभिमतानि मध्ये पठितानां परमात्ममन्वादिमहामायांतानां चतुर्णां मध्ये महामायाप्रसादबीजौ अधिकाक्षरेण स्वीकृतौ अवशिष्टयोः परमात्मअजपामन्वोः प्रत्येकं द्वे द्वे अक्षरे संख्यायां गृहीते । एवं मिलित्वा अस्य मंत्रस्य अष्टदशाक्षराणि सिद्धानि । अतएव उमामहेश्वराभ्यामष्टदशाक्षरीविद्या-सदा मां परिरक्षतु इत्युक्तं ॥ उद्धारकृता मंत्रवर्णगणनात् द्विचत्वारिंशत्संख्या कथिता

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सा चेत्थं ॥ सबालायाः कामराजोपासितपंचदश्याः षट्त्रिंशदक्षराणि परमात्मा अजपामन्वोः द्वे द्वे अक्षरे महामायाप्रासादबीजौ एकैकाक्षरात्मकौ एवं मिलित्वा द्विचत्वारिंशत् ॥ अतएव नेत्रवेदात्मकैर्वर्णैर्युता मां सर्वतोऽवतु इत्युक्तं ॥ इत्थमुद्धाराशयेन मद्बुद्ध्या निरूपितं तं सुधियो विभावयंतु ॥ ४२ ॥

इति ते कथितं देवि ब्रह्मविद्याकलेवरम् । त्रैलोक्यमोहनं नाम कवचं ब्रह्मरूपकम् ॥ सप्तकोटिमहाविद्यास्तंत्रेषु कथिताः प्रिये । तासां सारात्सारतरा याश्च विद्याः सुगोपिताः ॥ बहुनात्र किमुक्तेन श्रीमहाषोडशी परा । प्रकाशिता मया देवि यां पृच्छसि पुनः पुनः ॥ महाविद्यामयं ब्रह्मकवचं मन्मुखोदितम् । गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेत्ततः । देवीमभ्यर्च्य विधिवत्पुरश्चर्यां समाचरेत् । अष्टोत्तरशतं जप्त्वा दशांशं हवनादिकम् ॥ ततः सुसिद्धकवचः पुण्यात्मा मदनोपमः । मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्यांविना ततः ॥ वक्त्रे तस्य वसेद्वाणी कमला निश्चला गृहे । पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत् ॥ दशवर्षसहस्राणां पूजायाः फलमाप्नुयात् । आत्मानं तन्मयं कृत्वा यः पठेत्कवचं पर यं यं पश्यति वै शीघ्रं तस्य दासो भवेद्ध्रुवम् ॥ विलिख्य भूर्जे घुटिकां

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्थां धारयेद्यदि । कंठे वा यदि वा बाहौ स कुर्याद्दासवज्जगत् ॥ त्रिलोकीं
क्षोभयत्येव त्रैलोक्यविजयी भवेत् । तद्गात्रं प्राप्य शस्त्राणि महास्त्रादीनि
पार्वति । माल्यानि कुसुमानीव सुखदानि भवंति हि ॥ इदं कवचमज्ञात्वा यो
जपेत्सुंदरीं पराम् । नवलक्षं प्रजप्त्वापि तस्य विद्या न सिध्यति ॥ स शस्त्रघा-
तमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् । इदमेव परं यस्माद्भुक्तिमुक्तिप्रदायकम् ।
तस्मात्सर्वप्रयत्नेन पठनीयं मुमुक्षुभिः ॥ भूवेश्मगत्रिवृतषोडशनागशक्रदिग्युग्म-
वस्वनलकोणगबिंदुमध्ये । सिंहासनोपरिगतारकपीठमध्ये प्रोत्फुल्लपद्मनिलयां
त्रिपुरां भजेऽहम् ॥

इति रुद्रयामले गौरीश्वरसंवादे श्रीराजराजेश्वरीश्रीमहात्रिपुरसुंदर्यास्त्रैलो-
क्यमोहनाख्यकवचं समाप्तम् ॥

॥ अस्य कवचस्य तूत्कीलनं ॥ " ॐ हसकलह्रीं ह्रीं ह्रीं ह्रीं सकलह्रीं क्लीं क्लीं क्लीं श्रीं
श्रीं श्रीं क्रीं क्रीं क्रीं " रुद्रसूच्यग्रेण मूलविद्याशापं उत्कीलयोत्कीलय स्वाहा ॥ इति ॥

इदं त्रैलोक्यमोहनकवचं रा. रा. दामोदरराव लघाटे इत्येतैर्दत्तमस्ति ।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रिपुरसुंदरीस्तोत्रम् ।

श्रीगणेशाय नमः ॥ कदंबवनचारिणीं मुनिकदंबकादंबिनीं नितंबजितभूधरां सुरनितंबिनीसेविताम् । नवांबुरुहलोचनामभिनवांबुदश्यामलां त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ १ ॥ कदंबवनवासिनीं कनकवल्लकीधारिणीं महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् । दयाविभवकारिणीं विशदलोचनीं चारिणीं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ २ ॥ कदंबवनशालया कुचभरोल्लसन्मालया कुचोपमितशैलया गुरुकृपालसद्वेलया । मदारुणकपोलया मधुरगीतवाचालया कयापि घननीलया कवचिता वयं लीलया ॥ ३ ॥ कदंबवनमध्यगां कनकमंडलोपस्थितां षडंबुरुहवासिनीं सततसिद्धसौदामिनीम् । विडंबितजपारुचिं विकचचंद्रचूडामणिं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ ४ ॥ कुचांचितविपंचिकां कुटिलकुंतलालंकृतां कुशेशयनिवासिनीं कुटिलचित्तविद्वेषिणीम् । मदारुणविलोचनां मनसिजारिसंमोहिनीं मतंगमुनिकन्यकां मधुरभाषिणीमाश्रये ॥ ५ ॥ स्मरेत्प्रथमपुष्पिणीं रुधिरबिंदुनीलांबरां गृहीतमधुपात्रिकां

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

मधुविघूर्णनेत्रांचलाम् । घनस्तनभरोन्नतां गलितचूलिकां श्यामला त्रिलोचन-कुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ ६ ॥ सकुंकुमविलेपनामलकचुंबिकस्तूरिकां समंदहसितेक्षणां सशरचापपाशांकुशाम् । अशेषजनमोहिनीमरुणमाल्यभूषांबरां जपाकुसुमभासुरां जपविधौ स्मराम्यंबिकाम् ॥ ७ ॥ पुरंदरपुरंध्रिकाचिकुरबंध-सैरंध्रिकां पितामहपतिव्रतां पटुपटीरचर्चारताम् । मुकुंदरमणीं मणीलसदलं-क्रियाकारिणीं भजामि भुवनांबिकां सुरवधूटिकाचेटिकाम् ॥ ८ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं त्रिपुरसुंदरीस्तोत्रं संपूर्णम् ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

...प्रतिनिधियों के समक्ष
...कनाडा के ...मन्त्री श्री सेण्ट लारेंट न
...काश्मीर में राष्ट्र मंडलीय सेनाएं नियुक्त
...रन के प्रस्ताव पर प्रकाश डालते हुए
...हा कि हम इस सम्मेलन में हस्तक्षेप करते
... प्रतीत होना नहीं चाहते थे। हमने
... जानना चाहा था कि क्या ऐसी कार्य-
...ी सहायक सिद्ध होगी। प्र. ट्र.—रा.

...न में जुलूस व सभा पर से प्रतिबन्ध हटा

सलेम १८ जनवरी। बुनकरों द्वारा ...लन आरम्भ करने के पश्चात सलेम ...तथा उपनगर में जुलूस निकालने तथा ...निक सभा आदि करने पर जो प्रति-...गाया गया था, वह कल यहां के ...यों के प्रतिनिधियों के इस आश्वा-... उठा लिया गया कि अब किसी प्रकार ...दोलन नहीं किया जायगा। स्मरण ...गत ९ जनवरी को बुनकरों द्वारा ... आरम्भ किया गया था। इसमें ...त गिरफ्तार किये गये थे। गिर-... गये व्यक्तियों में २७ स्त्रियां भी ... हैं। इस सम्बन्ध में कहा जाता है ... कमी के कारण बुनाई करने वाले ...न्द कर दिये गये। इस प्रकार की ... बुनकर बेकार हो गये और ...न्दोलन आरम्भ किया गया।

स्वतन्त्रता-दिवस पर विशेषांक निकाल सकेंगे

...ल्ली १७ जनवरी। उद्योग ...भाग की एक विज्ञप्ति में ... कि भारत सरकार ...जनवरी को स्वतन्त्रता दिवस

...ाा। के ११।-,
...म २१.
... ४९,
... एलेन
...तापारा
...०॥।=.

...र

१३)
१३)
१७=)
...१४
...०१।-)
...१॥।≡)॥
१८॥)॥
१२॥।=.

...ब्रा ८।=,
...डि २॥।-,
... ४=, वैकु-
...=.

...गलोर ऊलेन
...घम प्रिफरेंस
...वेतोर

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कार्यान्वित नहीं करते तो हम मजबूर होकर कानूनी कार्यवाहियां करनी पड़ेंगी।

आपने कहा कि मालिकों को श्रमिकों की हाल की चुप्पी से बहक नहीं जाना चाहिए क्योंकि यह स्थायी शांति नहीं है। श्रमिकों में आज भी गम्भीर असन्तोष फैला हुआ है और यदि उन्हें सन्तुष्ट करने सबंधी प्रयास नहीं किये गये तो इसका परिणाम खान के मालिकों के लिए बड़ा भयंकर साबित हो सकता है।

सामान्यतया मालिक मजदूर के बीच सुन्दर सम्बन्ध स्थापित रहने से दोनों की भलाई ही होती है इस तथ्यको अब मालिक जितनी जल्दी समझ ले उतना ही अच्छा।

शक्कर उद्योग के श्रमिकों से हड़ताल न करने की सरकारी अपील

लखनऊ, १८ जनवरी। कल एक प्रेस नोट द्वारा उत्तरप्रदेश की सरकार ने शक्कर उद्योग के श्रमिकों से अपील की कि वे इस समय हड़ताल करने की भावना का त्याग कर दें।

प्रेस नोट में सरकार ने श्रमिकों को आश्वासन दिया है कि मजदूरों के १९४९-५० वर्ष की बोनस की मांग सरकार ने निर्णयार्थ भेज दी है।

सरकार ने यह भी चेतावनी दी कि शक्कर का उद्योग राज्य का एक मात्र प्रमुख उद्योग है; इसपर अवांछनीय दबाव नहीं डाला जाना चाहिये। अन्य राज्यों के शक्कर उद्योग के मुकाबले यदि हमारे राज्य के शक्कर उद्योग पर अनोचित दबाव डालने

विचार है कि संयुक्त राष्ट्र संघ की असेम्बली में काश्मीर सम्बन्धी विचार-विनिमय के समय भारत की तर्कहीन प्रदर्शित करके राजनीतिक वातावरण से लाभ उठाने का लियाकत ने यह प्रयत्न किया है अथवा उन्होंने पाकिस्तान की जनता पर यह भाव व्यक्त करने का प्रयत्न किया है कि अधिकांश प्रधान मन्त्री पाकिस्तान के पक्ष में हैं और वार्ता में पाकिस्तान की विजय हुई है।

प्रधान मन्त्रियों के निकटस्थ तटस्थ सूत्रों ने कल बताया कि वार्ता में कोई भी प्रस्ताव वस्तुतः परीक्षण की अवस्था तक नहीं पहुंच पाये। प्रथम दिन परिस्थिति का दोनों दलों ने स्पष्टीकरण किया था और दूसरे दिन श्री मेंजीज ने गतिरोध को भंग करने के उपाय के रूप में राष्ट्रमण्डलीय विशेषतया न्यूजीलैण्ड और आस्ट्रेलिया की सेनाएं काश्मीर में नियुक्त करने का प्रस्ताव किया था। इस प्रस्ताव के प्रति भारतीय प्रतिक्रिया यह हुई कि भारतीय जनमत किसी विदेशी सेना को भारतीय भूमि पर आने देना सहन नहीं करेगा। इसके अतिरिक्त, ऐसी कार्यवाही से विश्व के वर्तमान तनाव के वातावरण में काश्मीर जैसे सैनिक महत्व के स्थान में विदेशी सेना की नियुक्ति का अर्थ वहां पश्चिमी सैनिक अड्डे की स्थापना [illegible] सकता है। इस आपत्ति को [illegible] समर्थन मिलने [illegible] हुए प्रधान मन्त्रियों ने प्रस्ताव [illegible] काफी नीचे उ[illegible] विचार करना नहीं चाहा। [illegible] विशेष जो[illegible] [illegible] वातावरण [illegible] [illegible] पाकि-

CSU-Sringeri Campus Rare Book and Manuscript Collection. Sringeri